# श्री कीलक स्तोत्र

Kilak Stotram — The Key Hymn

ॐ विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे।
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे॥१॥

सर्वमेतद्विजानीयान्मन्त्राणामपि कीलकम्।
सोऽपि क्षेममवाप्नोति सततं जप्यतत्परः॥२॥

सिद्ध्यन्त्युच्चाटनादीनि कर्माणि सकलान्यपि।
एतेन स्तुवतां देवीं स्तोत्रवृन्देन भक्तितः॥३॥

न मन्त्रो नौषधं तत्र न किञ्चिदपि विद्यते।
विना जप्येन सिद्ध्येत सर्वमुच्चाटनादिकम्॥४॥

समग्राण्यपि सिद्ध्यन्ति लोकशङ्कामिमां हरः।
कृत्वा निमन्त्रयामास सर्वमेवमिदं शुभम्॥५॥

स्तोत्रं वै चण्डिकायास्तु तच्च गुप्तं चकार सः।
समाप्तिर्न च पुण्यस्य तां यथावन्नियन्त्रणाम्॥६॥

सोऽपि क्षेममवाप्नोति सर्वमेव न संशयः।
कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः॥७॥

ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति।
इत्थं रूपेण कीलेन महादेवेन कीलितम्॥८॥

यो निष्कीलां विधायैनां चण्डीं जपति नित्यशः।
स सिद्धः स गणः सोऽपि गन्धर्वो जायते ध्रुवम् ॥९ ॥

न चैवाप्यटतस्तस्य भयं क्वापीह जायते।
नापमृत्युवशं याति मृतो मोक्षमवाप्नुयात् ॥१० ॥

ज्ञात्वा प्रारभ्य कुर्वीत ह्यकुर्वाणो विनश्यति।
ततो ज्ञात्वैव सम्पूर्णमिदं प्रारभ्यते बुधैः ॥११ ॥

सौभाग्यादि च यत्किञ्चिद् दृश्यते ललनाजने।
तत्सर्वं तत्प्रसादेन तेन जप्यमिदं शुभम् ॥१२ ॥

शनैस्तु जप्यमानेऽस्मिन् स्तोत्रे सम्पत्तिरुच्चकैः।
भवत्येव समग्रापि ततः प्रारभ्यमेव तत् ॥१३ ॥

ऐश्वर्यं तत्प्रसादेन सौभाग्यारोग्यमेव च।
शत्रुहानिः परो मोक्षः स्तूयते सा न किं जनैः ॥१४ ॥